श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनिवासमहादेशिक कटाक्षलब्धोभयवेदान्तज्ञानेन
शुण्डप्पाळ्यापरनामधेयगोपालपुरवासिना श्रीशैलरामभद्राचार्येण विरचिता

# ॥ श्रीनिवासमहादेशिक पादुकाविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. R. Thirunarayanan of Srirangam for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीनिवासमहादेशिक पादुकाविंशतिः ॥

ज्ञानानुष्ठानवैराग्यशेवधिः श्रितवत्सलः।
श्रीनिवासयतीन्द्रो मे सन्निधत्तां सदा हृदि॥

गुरून् प्रणम्य महतामाज्ञया विवृणोम्यहम्।
श्रीश्रीनिवासयोगीन्द्र पादुकाविंशतिं मुदा॥

श्रीमच्छ्रीवासयोगीन्द्रपादुकाऽवतु पावनी।
यद्भक्त्या मनसश्शुद्धिस्तत्पदं सुलभं ततः॥ १ ॥

श्रीमच्छ्रीवासयोगीन्द्रदेशिकेन्द्रपदावनिम्।
स्तोष्यामि तत्र वाचं मे ददतां तद्दया शुभा॥ २ ॥

श्रीवाससंयमिगुरो तव पादरक्षां
स्तोतुं यतेऽल्पधिषणोऽपि मदीयजिह्वा।
नान्यत्र याति भजते न च मौनभावं
कुर्यां किमत्र रसना मम साऽनधीना॥ ३ ॥

श्रीवासदेशिकयतीश्वरपादुके त्वं
क्वाहं क्व मन्दधिषणस्तदपि त्वदीये।
स्तोत्रे प्रवृत्तिरतिसाहसमेतदागः
क्षान्त्या निरस्य मम देहि गिरं तदर्हाम्॥ ४ ॥

श्रीवासदेशिकपदावनि संस्तुवन्ति
प्राज्ञा मतेर्विभवतो भवतीमहं च।
स्तौमि त्वदीयदयया तव तत्प्रसिद्ध्यै
वाचं विधेहि मधुरां तदपेक्षया मे॥ ५ ॥

www.prapatti.com

श्रीवासदेशिकगुरूत्तमपादुके त्वां
    भक्त्या भजन्ति य इहाल्पधियोऽपि लब्ध्वा।
अध्यात्मशास्त्रधिषणासिलतां सुतिग्मां
    पाषण्डमुख्यतरुखण्डनमाचरन्ति॥ ६ ॥

श्रीवाससंयमिगुरोर्मणिपादुके त्वं
    संपूज्यसे नियमतस्सदनेषु येषु।
तेभ्योऽपयान्ति भयरोगपिशाचिकाद्याः
    ज्येष्ठाभवा अथ वसेदचला च लक्ष्मीः॥ ७ ॥

श्रीवासदेशिकपदावनि तत्पदाब्ज-
    संबन्धसंपदिह मे तव चापि तुल्यम्।
तद्धारणं परमभूत्तव भाग्यतोऽत्र
    ह्यन्तेवसत्तरतमत्वमुदाहृतिर्नः॥ ८ ॥

श्रीवाससंयमिगुरोश्चरणावनि त्वद्-
    ध्याने विशेषणतयाऽपि तदङ्घ्रिपद्मम्।
ध्यातं भवेत्तदनुचिन्तनतो न ते स्यात्
    ध्यानं तदस्तु तव चिन्तनमेव नित्यम्॥ ९ ॥

श्रीवासदेशिकपदावनि तावकीनां
    किं वच्मि कारुणिकतां परगामतुल्याम्।
त्वत्प्रापितार्थपदरेणुभिरप्रसिद्धा
    देशा अपीह कति वा रचिताः कृतार्थाः॥ १० ॥

याचे यतीश्वरपदावनि किञ्चिदेतत्
    विज्ञापनं शृणु गुरोश्चरणं भवत्याम्।
आरोहिणं द्रुतमथानय मामकीनं
    शीर्षं न चेत् कथय मे सुलभं कथं सः॥ ११ ॥

श्रीवासदेशिकपदावनि पादपद्मात्
    त्वामेव वच्मि महतीं विरहे तव स्यात्।

www.prapatti.com

नास्यावनाप्तिरवनाप्तिरभूत् त्वदाप्तौ
श्रीरामपादभरतौ हि निदर्शनं नः॥ १२॥

श्रीश्रीनिवासयतिनायकपादुके ते
डोलोत्सवं प्रमदतस्तु यथाविभूति।
ये कारयन्ति गुरुपादसरोजवृत्तौ
डोलायितं गळति मानसवृत्ति तेषाम्॥ १३॥

श्रीवाससंयमिगुरूत्तमपादरक्षे
ये वा मुहुर्विरचयन्ति रथोत्सवं ते।
तेषां तदैव हि मनोरथपूर्तिमीशः
कुर्यान्मनोरथगतिं च विहायसिस्थम्॥ १४॥

श्रीवासदेशिकपदावनि देवि ये त्वां
भक्त्या वसन्तसमयोत्सवतोऽर्हयन्ति।
तेभ्यो वसन्तसचिवो मदनोऽपसर्पेत्
तेषां गृहे स्युरमराश्शुभदा वसन्तः॥ १५॥

यः श्रीनिवासयतिशेखरपादुके त्वां
आराध्य सम्यगभिषिच्य निवेद्य किञ्चित्।
तीर्थं पिबत्यहरहस्स विमुक्तदोषो
युक्तस्सुखेन चिरमत्र वसेत्प्रमोदात्॥ १६॥

पुण्यर्क्षदिव्यदिवसे गुरुपादुके ते
क्षीराभिषेकमथ भक्ष्यनिवेदनं यः।
भक्त्या करोति स विधेयकलत्रपुत्र
गोभू सुवर्ण धन धान्य समृद्धिमान् स्यात्॥ १७॥

ये त्वां गुरोः पदवनिं नियमेन मासम्
आत्मीयदुर्गतिविनाशकृते स्तुवन्ति।
ते क्षिप्रमेव करिगण्डमदाम्बुपान-
मत्ताळिशब्द मुखरीकृतमन्दिरास्स्युः॥ १८॥

www.prapatti.com

श्रीश्रीनिवासयमिदेशिकपादुके त्वद्-
ध्यानात् प्रधावति यतो गुरुपातकौघः।
त्वद्ध्यानमिच्छति जनोऽयमतस्त्वदीये
ध्याने मनो मम कुरु प्रवणं त्वमेव॥ १९ ॥

देवि त्वमेव शरणं भव नो गुरुर्यत्
स स्वाश्रितादपि जनाद्व्रजति स्वकीयम्।
प्रीतो भवेद्यदनतिक्रमणीयताङ्घ्र्योः
आलंबनाच्च चरणावनिसङ्ग्रहस्य॥ २० ॥

अस्मद्गुरूत्तमपदावनि पादपद्मात्
त्वामेव देवि महतीं शरणं भजामः।
तत्सन्निधिस्तु नियता न हि नो भवेद्यत्
त्वं त्वस्मदालयगता फलदा सदा स्याः॥ २१ ॥

श्रीश्रीनिवासगुरुशेखरपादुकेऽस्मद्
गेहेष्ववाप्य दययाऽतिलघीयसीं नः।
पूजां निरस्य दुरितानि च नः कुटुंबं
रक्षन्त्यरोगभयमायुगकोटि जीयाः॥ २२ ॥

ये रामभद्ररचितां यतिमानिवास-
श्रीपादुकाविषयविंशतिमादरेण।
नित्यं स्तुवन्त्युषसि तान् सकला च संपत्
ईयात्कटाक्षवशतः कलशाब्धिजायाः॥ २३ ॥

वेदशीर्षरसज्ञाय वेदान्ताचार्यभक्तये।
श्रीनिवासयतीन्द्राख्य देशिकाय नमो नमः॥ २४ ॥

॥ इति श्रीनिवासमहादेशिक पादुकाविंशतिः सम्पूर्णा ॥



www.prapatti.com